JETIR.ORG ISSN: 2349-5162 | ESTD Year : 2014 | Monthly Issue
JOURNAL OF EMERGING TECHNOLOGIES AND INNOVATIVE RESEARCH (JETIR)
An International Scholarly Open Access, Peer-reviewed, Refereed Journal

# असमप्रदेशस्य दलगोमा-महापुरुषीयासत्रस्य साँचिपाण्डुपेः स्वराक्षरविन्यासः- एकम् अवलोकनम् (नामघोषाग्रन्थस्य निर्वाचितसाँचिपत्रस्य विशेषालोचनम्)

**डॉ बिभूति लोचन शर्मा**
**सहकारी अध्यापकः, असमीया विभागः**
**बडोलेण्डविश्वविद्यालयः, बि.टि.आर्, असमः**

**सारसंक्षेपः**

असमप्रदेशस्य गोवालपाराजिलायाः दलगोमानमके ऐतिहासिकग्रामे वर्तते दलगोमा महापुरुषीया सत्रम् । सत्रस्यास्य नामकरणे प्रतिष्ठायां गरिमायां सांस्कृतिकपरम्परायाः च विन्यासे श्रीमतः शंकरदेवस्य नाम अविच्छेद्यरूपेण जनमुखेषु उच्चार्यते । न केवलं जनश्रुतिः कथागुरुचरिद्ग्रन्थेऽपि सत्रस्यास्य समुल्लेखः तस्य सत्रस्य ऐतिहासिकगुरुत्वं सांस्कृतिकप्रमूल्यं च प्रवर्धयतीति नेत्युक्तिः । किमधिकम् विविधैः ऐतिहासिकवस्तुजातै भरितं साँचिपत्रलिखितग्रन्थरत्नालंकृतं च सत्रमिदम् अद्यावधि ज्ञानगर्भसरोवरैवाभाति धरातले ।

अस्मदालोचिते शोधपत्रे दलगोमा-महापुरुषीयासत्रस्य साँचिग्रन्थेषु नामघोषाया निर्वाचितसाँचिपत्राणां सहयोगात् स्वरवर्णांनां स्वरचिह्नानां च रूपाणि विश्लेषयिष्यन्ते । निर्वाचितसाँचिपत्राणां वर्णविन्यासकाले दलगोमासत्रोपलब्धानां साँचिग्रन्थोपलब्धानां अक्षरविन्याससहयोगात् तुलनामुलकमालोचनं च करिष्यते ।

दलगोमासत्रस्थितेषु साँचिग्रन्थेषु नामघोषाग्रन्थस्यस्य लिपिवैशिष्ट्यस्य लिपिकारवैशिष्ट्यस्य च आलोचनं शोधकार्येऽस्मिन् कर्तुं यतिष्यामहे ।

**शब्दकुञ्चिकाः लिप्यन्तरम्,** वर्णविन्यासः, स्वरवर्णाः, स्वरचिह्ना

**विषयप्रवेशः**

प्राचीनासमस्य शिलालेख-स्तम्भलेख-ताम्रलेख-साँचिपत्रलेख-तुलापत्रलेख-भूर्जपत्रलेख-मूद्रालेख-मूर्तिलेखादिषु विस्तारितानि अक्षराणि स्वकीयरूपै वैशिष्ट्यैश्च भारतीयलिपे गवेषणक्षेत्रस्य वैशाल्यं ऐतिहासिकं गुरुत्वं च प्रस्तौति । एतेषामक्षराणां विविधरूपाणां परिचयः पूर्वसूरीभिः प्रदत्तः । तैश्च प्रद्त्ताक्षरविन्यासमधिकृत्य अनेकानि गवेषणकार्याणि यद्यपि सञ्जातानि तथापि अनेकानि अवशिश्यन्तेऽद्यावधिः । शिलास्तर-ताम्रलेख-साँचिपत्रादिषु उपन्यस्तानाम् अक्षराणां सर्वैश्च च रूपैः सह परिचयं प्राप्तुं निर्वाचितानाम् अनुसन्धित्सुगवेषकाणां संघवद्धप्रचेष्टाया प्रयोजनमस्तीति नेत्युक्तिः |

अक्षराणाम् आकृतिगतवैविध्यसम्भूतौ संशयद्विधावोधौ अशुद्धपाठसृष्टये कारणभूतौ । असमस्य साँचिपत्राणां पाठसमीक्षाकाले इद्दशमाकृतिवैविध्यं भूयो लक्ष्यते । साँचिपत्रलिखितग्रन्थानाम् आक्षराणां सचित्रविश्लेषणम् एव तन्निहितलिपीनां

स्वरूपमुन्मोचयिष्यतीति अस्माकं मतिः। नारायणदासमहोदयेन सन्दर्भेऽस्मिन् स्वकीये 'विश्वलिपिर भूमिका'नामके ग्रन्थे अक्षराणां विकाशविषयकं विश्लेषणमुपण्यस्तम् (२००८,पृ१८२-२१८)।[१] तत्पूर्वकालिकेषु लिपिविषयकविशेषज्ञेषु अन्यतमो महेश्वर नेओग महोदयः शिलालिपि-ताम्रलिपि-मूर्तिलिप्यादिविषयेषु तदीये प्राच्यशासनावलीग्रन्थे स्वकीयम् अनुशासनविषयकम् ऐतिहासिकं तथ्यपूर्णं च आलोचनं कृतम् । पूर्वसूरिकृतविश्लेषण्मेव पृष्ठभूमिं कृत्वा गोवालपारा जिलायाः दलगोमा-महापुरुषीयासत्रस्य साँचिग्रन्थेषु नामघोषाया निर्वाचितसाँचिपत्राणां सहयोगात् स्वरवर्णानां व्यञ्जनवर्णाणां स्वरचिह्नानां व्यञ्जनचिह्नानां संख्यालिपीनां सचित्रविश्लेषणम् अस्माभिः करिष्यते ।

**दलगोमा-महापुरुषियासत्रस्य परिचयः**

असमप्रदेशस्य गोवालपाराजिलाया दुधनै इति स्थानादुत्तरस्यां दिशि १५ किलोमिटर अन्तः दलगोमानामके ऐतिहासिकग्रामे सत्रमिदं वर्तते । सत्रस्यास्य नमकरणे प्रतिष्ठायां, गरिमायां सांस्कृतिकपरम्परायाविन्यासे च श्रीमतः शंकरदेवस्य नाम अविच्छेद्यरूपेण लोकसमाजे उच्चार्यते । न केवलं जनश्रुतिः कथागुरुचरितग्रन्थेऽपि सत्रस्यास्य समुल्लेखो दलगोमासत्रस्य ऐतिहासिकं गुरुत्वं सांस्कृतिकं प्रमूल्यं च उद्‌घोषयति । प्रवादानुसारं दलनामके ग्रामे दलनामकस्य सूरणवृक्षस्य उपरि फणां प्रसार्य कश्चित् गोमासर्पः शंकरदेवम् अभिमुखिभुय स्थितवान् । तदवसरे स्थानेऽस्मिन् दलगोमानामकं सत्रमेकं भविष्यतीति महापुरुषः शंकरदेवः भविष्यवाणीमकरोत् ।[२] शंकरदेवस्य भविष्यवाणेः सप्तत्यधिकद्विशतवर्षादनन्तरं(२७०) रामचरणठाकुरवंशजेन हरमोहनठाकुरेण सत्रस्यास्य प्रतिष्ठामकरोत् ।[३] 'आम पोवा बापुर सत्र' इत्यपि अपरं नाम सत्रस्यास्य अस्तीति जनमुखेषु श्रूयते । प्रवादानुसारं हरमोहनठाकुरः आषाड़-श्रावणमासयोः काले रोगकारणात् आम्रभक्षणं कर्तुम् असमर्थो सन् माघमासे वृक्षनिकषा आक्षेपं कृतवान् । तदवसरे तस्मादेव आम्रवृक्षात् आम्रमेकं भूमौ अपतत् । तस्मात् कालात् 'आम पोवा बापुर सत्र' इति नाम्ना सत्रस्य नामकरणं जनाः कुर्वन्तीति जनश्रुतिः ।[४] तत्रैव भागवतपुराण-नामघोषा-गुणमालाप्रभृतिभिः साँचिपत्रलिखितग्रन्थैः, कीर्तनगृह-मणिकूट-पदशिला-गुर्वासनप्रभृतिभिश्च[५] अनेकै ऐतिहासिकसमलैः अलंकृतमिदं सत्रं कीर्तन-भाओना[६]-पालनाम[७]-धर्मसभादिभिः सांस्कृतिकानुष्ठानैः स्थानमिदं संस्कृतिकस्थानरूपेण पर्यवसयत् स्वकीयं गुरुदायित्वं पालयत् अद्यावधि विराजते ।

**निर्वाचितसाँचिग्रन्थस्य परिचयः समीक्षा च**

श्रीमद्धि महापुरुषेण माधवदेवेन विरचिताया् नामगोषायाः साँचिपत्रप्रतिकृतिः १०७संख्यकेषु पृष्ठाषु उपलभ्यते । ग्रन्थस्य पृष्ठाद्वयस्य((१-२) १०% नष्टप्रायः, अवशिष्टपृष्ठाः सुरक्षिताः स्पष्टरूपाक्षरैश्च उपलभ्यन्ते । ग्रन्थस्य साँचिपत्रपृष्ठाषु दशतः त्रयोदश पर्यन्तं आवल्यः वर्तन्ते । पुस्तकस्य साँचिपत्राणां आक्षराणि आकृतिगतसौन्दर्येण नैव युक्तानि, पङ्क्तिवद्धवाक्याण्यपि च सरलशिरोरेखया नैव निवद्धानि । तथापि स्पष्टतया अक्षराणि विलिख्य, अनवधानगतविलुप्तवर्णानि च सूचकचिह्नैः साँचिपत्रस्य ऊर्धभागे आधोभागे च रिक्तस्थाने समुल्लिख्य शब्दगतसंशयो दुरीकृतः । पाठान्तरितरूपाणि वर्णाशुद्धयश्च लिपिकारस्य परिपक्वतायां संशयमुत्पादयन्ति । विशेषतया पुस्तकेऽस्मिन् ज(ज), (य), य (य्र) न(न), ण(ण), श(श), ष(ष), स(स) इत्येतानामक्षराणां विषये अनवधानकारणात् अनेकानि अशुद्धपदानि लक्षन्ते । पाठसमीक्षाकाले साँचिपत्रनामघोषायां प्राप्तानां पदानां मुद्रितनामघोषापदानां च तुलनात्मकनिरीक्षणेन प्राप्तानामक्षराणां विन्यासं कर्तुं यतते । अध्ययनकाले वर्णचित्रसंग्रहणार्थं लिप्यन्तर-पाठान्तर-वर्णाशुद्धिप्रभृतिं च प्रदर्शनार्थं निम्नोक्तसाँचिपत्रं स्वीकृयते ।



ना.घ./द.म.स/गो/प.९./पृ-अ.(नामघोषा, दलगोमा माहापुरुषीया सत्र गोवालपारा, नवमपत्रस्य प्रथमपृष्ठम्-

**निर्वाचितसाँचिपत्रस्य लिप्यन्तरितरूपाणि लिप्यन्तरक्रमश्च-**

असमीयालिप्यां लिखितस्य साँचिपत्रस्य देवनागर्यां लिप्यन्तरकाले यथा मूलं तथैव रक्षितुं यतते । प्रतिपङ्क्तौ च यावन्त्यक्षराणि मूले सन्ति तथैव तानि कुटिलकोष्ठके रक्षितानि । अवगमनसौकर्यार्थं प्रक्षिप्तांशे नीलवर्णः वर्णाशुद्धौ रक्तवर्णः पाठान्तरितांशे च हरीतवर्णः प्रदत्तः । अधोभागे प्रतिपङ्क्तौ प्राप्तरूपस्य लिप्यन्तरितरूपं देवनागर्यां प्रदत्तम् ।

| पङ्क्तिः | ना.घ./द.म.स/गो/प.९./पृ-अ.(नामघोषा, दलगोमा माहापुरुषीया सत्र गोवालपारा, नवमपत्रस्य प्रथमपृष्ठम्- |
|---|---|
| प्रथमपङ्क्तिः | (তোমাö)তসে খেলাৱে কেৱলে বাদ । তোহ্মাৰ তত্ত্বক নজাৱ ॥৫৭॥ ঐস্বৰ্য ভোগৰ মদে মত হুয়া {(तोमा◌̀)तसे खेलावे केवले बाद । तोह्मार तत्त्वकनजाव॥५७॥ ऐस्वर्य भोगर मदे मत हुया} |
| द्वितीयपङ्क्तिः | ইশ্বৰক পৰাঙুমুখ ভৈল জিতো জন । জেন জির্ন্ন গাই সিতো দুৰ্ঘোৰসঙ্সা(ৰে) মহা পঙ্কেপ {इश्वरक पराङुमुख भैल जितो जन । जेन जिर्न्न गाइ सितो दुर्घोर सङ्सार(रे) महा पङ्केप} |
| तृतीयपङ्क्तिः | ড়ি হৱয় মগন॥৫৮॥ হৰি নাম ধৈত্য কৰি বেদ পস্থ পৰি হোৰি । ফুৰে আতি পাসণ্ড সকল । ইহ {ड़ि हवय मगन ॥५८॥ हरि नाम धैत्य करि बेद पन्थ परि होरि । फुरे आति पासण्ड सकल । इह |
| चतुर्थपङ्क्तिः | পৰলোকে ভষ্ত । হুয়া পেট পুষি মাত্র । ফুৰে সিতো পৰম নিস্খল ॥৫৯॥ প্ৰাৰ্থনা ॥ তুমি চিত্য {परलोके भष्त । हुया पेट पुषि मात्र । फुरे सितो परम निस्खल ॥५९॥ प्रार्थना ॥ तुमि चित्य} |
| पञ्चमपङ्क्तिः | বৃতি মোৰ । প্রবর্ত্তক নাৰাৱণ । তুমি নাথে মঞি নাথা অন্ত । চৰন চত্রৰ চায়া । দিয়া দুৰ কৰা মায়া {बृति मोर । प्रवर्तक नारावण । तुमि नाथे मञि नाथा अन्त । चरन चत्रर चाया । दिया दुर करा माया } |
| षष्ठपङ्क्तिः | । কৰা দায়া মোক ভগ অন্ত । তুমি মোৰ অন্তৰ্যামি । তোজু ভৃত্য ভৈলু আমি ।জানি {। करा दाया मोक भग अन्त । तुमि मोर अन्तर्यामि । तोजु भृत्य भैलु आमि । जानि} |

| | |
|---|---|
| সপ্তমপঙ্কতিঃ | কৃপা কৰা ঋসিকেশ ।দান্তে তৃন তুলি লঞঁ । জিমতে সেৱাত ৰঞঁ । দিৱ মোক সেহি উপদে {कृपा करा ऋसिकेश । दान्ते तृन तुलि लञँ । जिमते सेवात रञँ । दिव मोक सेहि उपदे } |
| অষ্টমপঙ্কতিঃ | শ ‖ ৬১‖ তুমি ভক্ত কল্পতৰু । বাহিৰে ভিতিৰে গুৰু। তুমি বিনে নাহি মোৰ আৰ । কৃপা{श॥६१॥ तुमि भक्त कल्पतोरु । बाहिरे भितरे गुरु । तुमि बिने नाहि मोर आर । कृपा} |
| নবমপঙ্কতিঃ | কৰা হে হৰি । চ(ৰ)নত ৰক্ষা কৰি । দিৱা মক সেয়া ৰষষাৰ ॥৬২॥ তুমি হৰি কৃপাময় । বাহি { करा हे हरि । च(र)नत रक्षा करि । दिवा मक सेया रषषार ॥६२॥ तुमि हरि कृपामय । बाहि} |
| দশমপঙ্কতিঃ | ৰত গুৰুৰুপে । অনুগ্ৰহ কৰি আচা মোক । অন্তৰ্যামি গুৰুৰুপে । তাকে সোত্য কৰা মোৰ । তোজু {रत गुरुरुपे । अनुग्रह करि आचा मोक । अन्तर्यामि गुरुरुपे । ताके सोत्य करा मोर । तोजु |
| একাদশ পঙ্কতিঃ | নামে সদা ৰতি হৌক ॥৬৩॥হে ভগৱন্ত গুৰু তজুপ(দে) মন মোৰ । জি কালত থিতিক লভৱ । তো { नामे सदा रति हौक ॥६३॥ हे भगवन्त गुरु तजुप(दे) मन मोर । जि कालत थितिक लभव । तो } |
| দ্বাদশ পঙ্কতিঃ | হ্মাৰ কৃপাত তেবে । ষমস্তে ষাধনা শ্ৰম । এড়াই সুখি হৈবোঁহো নিচ্চয় ॥৬৪॥হে প্ৰভু {ह्मार कृपात तेवे । षमस्ते षाधना श्रम । एड़ाइ सुखि हैबोँहो निच्चय ॥६४॥ हे प्रभू |

## निर्वाचितसाँचिपत्रस्य स्वराक्षराणां सचित्रविश्लेषणम्

| मूद्रिताक्षरम् | साँचिपत्राक्षरम् | वैशिष्ट्यम् | मूद्रिताक्षरम् | साँचिपत्राक्षरम् | वैशिष्ट्यम् |
|---|---|---|---|---|---|
| অ/ अ |   | वामभागे शिरोरेखानिकटवर्तिन्या अवनमितत्रिभङ्गरेखायाः अन्तिमविन्दुसंयोगिनी, दक्षिणभागे उलम्बरेखायाः तृतीयभागस्पर्शी च आनुभूमिकरेखा अकारस्य प्रथमाकृतिं निर्माति । देवनागर्याः अकारेण प्रभावितमिदमक्षरमित्याभति । वामभागे शिरोरेखावनतवक्ररेखान्तस्पर्शिनी आनुभूमिकरेखा दक्षिणभागे उलम्बरेखायाः तृतीयभागस्पर्शी च आनुभूमिकरेखा अकारस्य द्वितीयाकृतिं निर्माति । वामभागावनमितरेखाद्वययोः आकृतिवैविध्यम् च अकारद्वयोः भिन्नरूपतां प्रस्तौतः । | ঋ/ ऋ |  | शिरोरेखायाः दक्षिणविन्दुमारभ्य अधोमुखिरेखाद्वयं संयुज्य आनुभूमिकरेखया संसृष्टस्य त्रिकोणस्य मध्यभागवर्तिनी रेखा दक्षिणवामयोः रेखां स्पृष्ट्वा दक्षिणवर्तिरेखायाः च मध्यभागादग्रेसररेखाया दक्षिणविन्दुसंयोगिन्या उलम्बरेखायाः ऊर्धभागाद् वामोर्धमुखिनी रेखा च ऋकारस्य स्वरूपं प्रस्तौतः |
| | | | ৠ/ॠ | --- | ॠकाररस्यावस्थितिः दलगोमासाँचिपत्रेऽस्मिन् नावलक्ष्यते |
| আ/ आ |  | वामभागे शिरोरेखावनमितत्रिभङ्गरेखायाः अन्तिमविन्दुसंयोगिनी, दक्षिणभागे उलम्बरेखायाः तृतीयभागस्पर्शिनी चानुभूमिकरेखा; अपरा च शिरोरेखावनमितोलम्बरेखा आकारस्य अवस्थितिं प्रस्तुवन्ति। देवनागर्या आकारेण सह अस्य आंशिकसामञ्जस्यं लक्षणीयम् । | এ/ए |  | एकबिन्दुमारभ्य दक्षिणमुखिवक्रतां परिगृह्य अधोमुखिन्या उलम्बरेखाया अन्तिमविन्दुत वामगामिनी आनुभूमिकरेखा एकारस्य निर्माणं करोति |
| ই/इ |  | शिरोरेखासंलग्न-अर्धवर्तुलाकृतिनिर्मित-वक्ररेखायाः अधोवनमितमध्यभागादुत्पन्न-दक्षिणगाम्यधोमुखिरेखा, | ঐ/ऐ |  | एकारस्य उलम्बरेखात ईषद्वामोर्धमुखिनी एका रेखा ऐकारस्य निर्माणं करोति । |

| | | | | | |
|---|---|---|---|---|---|
| | | शिरोरेखायाः दक्षिणदिशि च ईषद्वामोर्धगामिरेखा इकारस्य आकृतिं प्रस्तौतः । देवनागर्याः इकारईकारयोः मिश्रणमत्र आंशिकतया लक्ष्यते । | | | |
| ঈ/ई | ------ | ईकाररस्यावस्थितिः दलगोमासाँचिपत्रेऽस्मिन् नावल्क्यते । | ও/ओ |  | एकबिन्दुमारभ्य दक्षिणमुखिवक्रतां परिगृह्य अधोमुखिन्याः रेखाया मध्यभागात् अर्धवर्तुलाकाररेखा ईषदूर्ध गत्वा ओकारस्य निर्माणं करोति । |
| উ/उ | ४ | शिरोरेखावनतमध्यवर्तिरेखायाःअन्तिमविन्दुसृष्टदक्षिणगामि-वामोर्धमुखिरेखा, तन्मध्यभागादुभूता वामोर्धमुखिनी अपरा च रेखा उकारस्य अवस्थितिं दर्शयतः । असमस्य साँचिपत्रेषु उकारस्य एव व्यवहारः अधिकतया लक्ष्यते ऊकारस्य चव्यवहारः प्रायः नास्त्येव । आधुनिककालस्य असमीयाभाषायां व्यवहृतस्य ऊकारस्य साम्यता अनेनाक्षरेण विद्यते | ঔ/औ |  | ओकारस्य शीर्षभागात् ईषद्वामोर्धमुखिनी एका रेखा औकारस्य निर्माणं करोति । |
| ঊ | ----- | ऊकाररस्यावस्थितिः दलगोमासाँचिपत्रे नावल्क्यते प्रत्युत् ऊकारस्य स्थामे उकारस्य व्यवहार परिलक्षते। | | | |

**निर्वाचितसाँचिपत्रस्य स्वराक्षराणां परिसंख्यागत तथ्यम्-**

| पङ्क्ति | अ | आ | इ | ई | उ | ऊ | ऋ | ॠ | ए | ऐ | ओ | औ | ऽ | ि | è | ी | ु | ू | ृ | ॄ | े | ै | ो | ौ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १म | | | | | | | | | | १ | | | | ५ | | | १ | | | | ७ | | २ | |
| २म | | | २ | | | | | | | | | | | ४ | ३ | | २ | | | | २ | १ | ३ | |
| ३य | | १ | १ | | | | | | | | | | | १ | ६ | | १ | | | | १ | १ | १ | |
| ४थ | | | | | | | | | | | | | | ४ | ५ | | ४ | | | | २ | | २ | |
| ५म | १ | | | | | | | | | | | | | ११ | ४ | | २ | | १ | | | | १ | |
| ६ष्ठ | २ | १ | | | | | | | | | | | | ५ | ४ | | ३ | | १ | | | | ३ | |
| ७म | | | | | १ | | १ | | | | | | | ४ | ५ | | १ | | २ | | ६ | | १ | |
| ८म | | १ | | | | | | | | | | | | ३ | ६ | | ३ | | १ | | ३ | | २ | |
| ९म | | | | | | | | | | | | | | ७ | ६ | | १ | | १ | | २ | | | |
| १०म | २ | १ | | | | | | | | | | | | ४ | २ | | ८ | | | | ३ | | ४ | |
| ११श | | | | | | | | | | | | | | ३ | ४ | | २ | | | | २ | | २ | १ |
| १२श | | | | | | | | | १ | | | | | ५ | २ | | २ | | २ | | ४ | १ | २ | |
| आहत्य संख्या | ५ | ४ | ३ | ० | १ | ० | १ | ० | १ | १ | ० | ० | ० | ५६ | ४७ | ० | ३० | | ८ | | ३२ | ३ | २३ | १ |

## उपसंहारः

साँचिपत्रेऽस्मिन् ७प्रकारेषु स्वराक्षरेषु १६संख्यकानि अक्षराणि लक्ष्यन्ते; ८प्रकारेषु स्वरचिह्नेषु च १९० संख्यकानि चिह्नानि परिलक्षन्ते । ईकार-ऊकार-ऋकार-ओकार-औकाराणां अवस्थितिर्न लक्षते । णकारस्थाने नकारस्य प्रयोगः[८], चकारस्थाने छकारस्य प्रयोगः[९], ओकारस्थाने अकारस्य व्यवहारः[१०] षकारस्थाने सकारस्य व्यवहारः[११] ऊकारस्थाने उकारस्य व्यवहारः[१२] सकारस्थाने षकारस्य व्यवहार इत्यादिवौशिष्ट्यानि उपलक्ष्यन्ते । गवेषणापते आलोचितानि स्वराक्षराणि कतिपयसाँचिपत्राधारितानि । असमस्य अत्रतत्र सहस्रसः साँचिपत्राणि समुपलब्धानि यत्र अक्षराणाम् आकृतिभिन्नता अपि दृश्यते । किन्तु इद्दशालोचनेन अक्षराणां स्वकीयवैशिष्ट्येन सह अपराणामक्षराणां तुलना यदा करिष्यते तदा एव भारतवर्षस्य अक्षराणामितिहासे लिपीनां स्थानं सुरक्षितं भविष्यतीति मन्यामहे ।

## संक्षिप्ताक्षरकोशः

१)ना.घ./द.म.स/गो/प.९./पृ-अ.( नामघोषा, दलगोमा माहापुरुषीया सत्र गोवालपारा, नवमपत्रस्य प्रथमपृष्ठम्-
२) ना.घ./द.म.स/गो/प.९./पृ-अ.७( नामघोषा, दलगोमा माहापुरुषीया सत्र गोवालपारा, नवमपत्रस्य प्रथमपृष्ठम् सप्तम पङ्क्ति)

## सन्दर्भतथ्यसूत्राणि

१) बिश्वलिपिर भूमिका ; २००५२, पृ-१८२-२१६
२) गुरु-चरित-कथा; पृ-१४६
३ ) सत्र आरु मठ मन्दिरर इतिवृत्त; पृ-७७-७९
४) तत्रैव
५) तत्रैव
६) तत्रैव
७) तत्रैव
८) ना.घ./द.म.स/गो/प.९./पृ-अ.७- तृन/तृण
९) ना.घ./द.म.स/गो/प.९./पृ-अ.५- चाया/छाया
१०) ना.घ./द.म.स/गो/प.९./पृ-अ.९- मक/मोक
११) ना.घ./द.म.स/गो/प.९./पृ-अ.९- रषार/रससार
१२) ना.घ./द.म.स/गो/प.९./पृ-अ.१०- रुपे/रूपे
१३) ना.घ./द.म.स/गो/प.९./पृ-अ.३- तोजु/तजु
१४) ना.घ./द.म.स/गो/प.९./पृ-अ.१२ षमस्ते/समस्ते

# ग्रन्थपञ्जी

१) साँचिपत्रम्
नामघोषा, दलगोमा माहापुरुषीया सत्र गोवालपारा, नवमपत्रस्य प्रथमपृष्ठम्-
२) मुद्रितग्रन्थाः
गोस्वामी, नारायनचन्द्र, सम्पा. नामघोषा आरु कीर्तन घोषा, ष्टुडेन्टच् ष्टरच्म् , कलेज हष्टेल रोड, गुवाहाटी, असम, द्वितीयं प्रकाशनम्,२०२१
दास, नारायण, बिश्वलिपिर भूमिका, बिना लाइब्रेरी, कलेज हष्टेल रोड, गुवाहाटी-१ पञ्चमं प्रकाशनम्, २००५

नेओग महेश्वर, सम्पा. गुरुचरित कथा, विश्वविद्यालय प्रकाशनविभागः, गुवाहाटी विश्वविद्यालयः, गुवाहाटी, द्वितीयप्रकाशनम्, २००३

पाटगिरि, जगन्नाथ, अबिभक्त गोवालपारा जिलार सत्र आरु मठ मन्दिरर इतिवृत्त, मनोरमा प्रकाश, भरलुमुख, गुवाहाटी-१, प्रथमं प्रकाशनम्, १९९१